## दृशे विख्ये च। (११/३४३८)

तुमर्थे छन्दसि इत्येव। दृशे विख्ये इत्येतौ छन्दसि विषये निपात्येते। [1]दृशेः केप्रत्ययः – 'दृशे विश्वाय सूर्यम्' (ऋ. १. ५०. १)। द्रष्टुम्[2]। विख्ये त्वा [3]हरामि। विख्यातुम्[4]॥

## शकि णमुल्कमुलौ। (१२/३४३९)

[5]छन्दसि इत्येव। [6]शक्नोतौ धातावुपपदे छन्दसि विषये [7]तुमर्थे णमुल् कमुल् [8]इत्येतौ प्रत्ययौ भवतः। णकारो वृद्ध्यर्थः। ककारो गुणवृद्धिप्रतिषेधार्थः। लकारः स्वरार्थः। '[9]अग्निं वै देवा विभाजं नाशक्नुवन्' (मै. सं. १. ६. ४)। विभक्तुमित्यर्थः। [10]'अपलुम्पं नाशक्नोत्' (मै. सं. १. ६. ५)। अपलोप्तुम् इत्यर्थः॥

## ईश्वरे तोसुन्कसुनौ। (१३/३४४०)

तुमर्थे छन्दसि इत्येव। ईश्वरशब्द उपपदे छन्दसि विषये तुमर्थे धातोः तोसुन्कसुन्[11]प्रत्ययौ भवतः। ईश्वरोऽभिचरितोः। अभिचरितुमित्यर्थः। ईश्वरो विलिखः। [12]विलिखितुमित्यर्थः। [13]ईश्वरो वितृदः। वितर्दितुमित्यर्थः[14]॥

## कृत्यार्थे तवैकेन्केन्यत्वनः। (१४/३४४१)

[15]छन्दसि इत्येव। कृत्यानामर्थो भावकर्मणी। तस्मिन् कृत्यार्थे छन्दसि विषये तवै केन् केन्य त्वन् इत्येते प्रत्यया भवन्ति। तवै – 'अन्वेतवै' (ऋ. ७. ४४. ५)। अन्वेतव्यम्[16]। 'परिधातवै' (अ. २. १३. २)। परिधातव्यम्। 'परिस्तरितवै' (काठ.सं. ३२. ७)। परिस्तरितव्यम्। केन् – नावगाहे। नावगाहितव्यम्। केन्य – 'दिदृक्षेण्यः' (ऋ. १. १. ४६. ५)। 'शुश्रूषेण्यः' (तै. आ. ४. १. १)। दिदृक्षितव्यम्। शुश्रूषितव्यम्। त्वन् – 'कर्त्वं [17]हविः' (अ. वे. १. ४. ३)। कर्तव्यम्। तुमर्थे [18]छन्दसि (३. ४. ९/३४३६) इति सयादिसूत्रेऽपि तवै विहितः, तस्य तुमर्थादन्यत्र कारके विधिर्द्रष्टव्यः॥

## अवचक्षे च। (१५/३४४२)

कृत्यार्थे छन्दसि इत्येव[19]। अवपूर्वात् चक्षिङः एश् प्रत्ययो निपात्यते। 'रिपुणा नावचक्षे' (वा. सं. १७. ९३)। नावख्यातव्यम् इत्यर्थः॥

---

1. दृशेः नास्ति ब. 2. इत्यर्थः इत्यधिकम् फ. 3. भरामि ह. 4. चकारात् विख्यै इत्यपि भवति – चक्षुर्विख्यै तनूभ्यः इत्यधिकम् अ. 5. तुमर्थे इत्यधिकम् ब. फ. ह. 6. शकौ धातूपपदे ह. 7. तुमर्थे नास्ति फ. 8. इति प्रत्ययौ फ. 9. अग्निर्वै देवानां विभाजं नाशक्नुवन् ह, तौ विभाजं नाशक्नोत् अ. 10. अवलुपं ह, अपलुपं नाशक्नुवन् मुद्रितः पाठः 11. इत्येतौ इत्यधिकम् फ. ह. 12 विलेखितुम् अ. फ. 13. ईश्वरो नास्ति ह. 14. इत्यर्थः नास्ति फ. 15. छन्दसि इत्येव नास्ति ह. 16. इत्यर्थः इत्यधिकम् फ. 17. रुचिः ब. 18. छन्दसि नास्ति फ. 19. वर्तते इत्यधिकम् ग. फ. ह.